ब्रह्मीभूत ब्रह्मश्री पं. सातवळेकर

शारदा

श्रावण १९६८
ऑगस्ट १८९०

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

श्रद्धाञ्जलिः

कार्यं वा साधयेयं देहं वा पातयेयम् ।

भारतराष्ट्रं धर्मभूमिः । अत्र धर्मः विद्यामूलः । विद्यामूलं संस्कृतम् । संस्कृतप्रसारेण विद्योपासना । विद्योपासना एव धर्मः । इदं धर्माचरणम् एव राष्ट्रसेवा । इयम् एतादृशी राष्ट्रसेवा एव येषां जीवनव्रतं ते पं. श्रीपाद दामोदर सातवळेकराः परमात्मनि विलीनाः । तेषां भौतिकं शरीरम् अग्निनारायणेन स्मृतिशेषं कृतम् । विनाशशील विनष्टम् । अवशिष्टम् अमृतं कार्यरूपम् ।

किं कार्यं पं. सातवळेकराणाम् ? वेदप्रकाशनम् ? संप्रति बहुभिः प्रकाश्यन्ते वेदाः । स्वाध्यायमण्डलस्थापनम् ? स्थाप्यन्ते प्रतिदिनं नव-नवीनाः संस्थाः कार्योत्सुकाः । शतवर्षोत्तरं जीवनम् ? श्रूयन्ते जीवन्तः दीर्घजीविनः तत्र तत्र विविधराष्ट्रेषु । नात्र कुत्रचित् तेषां विशेषः । तत् सर्वं सामान्यम् ।

इतरैः यद् उपेक्षितं अशक्यम् इति भिया दूरे स्थापितं तद् असिधाराव्रतं महर्षि सातवळेकरैः जीवनव्रतत्वेन आदृतम् । वेदाः न केवलं धर्मग्रन्थाः । समाजजीवने, दैनन्दिने राष्ट्रजीवने, मानवव्यविकसने वेदमन्त्राणां महान् उपयोगः, उपकारकत्वम् व्यवहार्यत्वं तैः सर्वेषां पुर-स्तात् स्थापितम् । तेषां विचारे लेखने किंबहुना समग्रजीवने वेदानां तेजस्विता साक्षात्कृता सर्वैः । इयमेव असामान्यता, क्रान्तदर्शि-महर्षिता ।

श्रेयांसि बहुविघ्नानि । महर्षि सातवळेकराणां जीवनमार्गः विघ्न-कण्टकाकीर्णः आसीत् । शासनं परकीयम् अस्तु स्वकीयं वा भवतु पं. सातवळेकराणां विषये सर्वदैव विरुद्धम् उपद्रवकारकं, कार्योत्कर्षघातकम् आसीत् । शताब्दिसमारोहे समाजेन तेभ्यः लक्षद्वयं रूप्यकाणां समर्प्य आनृण्यं संपादितम् इति दृष्ट्वा निर्लज्जं शासनं सलज्ज कथं कथम् अपि पद्मभूषणोपाधि समर्प्य पापक्षालने प्रवृत्तम् । तेभ्यः भारतरत्नोपाधि समर्प्य समये संमाननीयास्ते इति भृशं प्रयतितं 'शारदा'कारैः स्वयं दिल्लीश्वरान् साक्षात्कृत्य । परं हतभाग्य भारतशासनम् । महर्षि सातव-ळेकराणां विषये सामान्यां डाकमुद्राम् अपि प्रकाशयितुम् असिद्धम् इदं शासनं स्वीयम् अधः पतनं निश्चितीकरोति । विनाशकाले विपरीतबुद्धिः ।

'शारदा'कारेषु पौत्रनिर्विशेषं वात्सल्यं पूज्यपादानां 'पण्डितजी' इत्येतेषाम् । 'शारदा'-काराणां संस्कृत-प्रसार-जीवन-व्रते मार्गदर्शकाः दीपस्तम्भाः ते । गतानि विंशति वर्षाणि महद्भाग्यम् इदं लब्धं 'शारदा'-कारैः । अद्य 'शारदा'काराः भारतपितामहानां पण्डितजीपूज्यपादानां स्वर्गारोहणेन अनाथाः, निराधाराः शोकान्धकारसागरे मग्नाः ।

परं ... परं ... प्रशान्ते शोकावेगस्य प्रक्षुब्धे झञ्झावाते स्वात्मानं प्राप्ताः 'शारदा'काराः स्मरन्ति महर्षिवचनामृतम् "उत्तिष्ठत ! जाग्रत ! प्राप्य वरान् निबोधत ! ! !"

(अग्रिमपृष्ठे)

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई
शृङ्गेरी-शारदापीठ-श्री-शंकराचार्यैः संस्कृत-'शंकरकृपा'-त्वेन स्वीकृता।

सौर १६ श्रावण १८९० — वर्षम् ९ अङ्कौ १९-२०

शारदा

संपादकः वसन्त अ. गाडगीळ.

वार्षिकमूल्यम् रू. ८ * अस्य अङ्कस्य रू. ०-८०

॥ स्वराज्यस्य मन्त्रः ॥

अस्य श्रीस्वराज्यमन्त्रस्य ।
लोकमान्यस्तिलक ऋषिः ।
श्रीभारतमाता देवता। जगती छन्दः।
राष्ट्रप्रबोधनार्थं जपे विनियोगः ।

॥ हरिः ॐ ॥

जनानां तत् सुखकरं स्तुवीमहे
भुवौ लोकानां मोक्षरूपं स्वराज्यम्
ज्येष्ठतमं जन्मसिद्धमीशदत्तम्
लप्स्ये ध्रुवं हेतिभिर्वान्यसाधनैः ॥

घोडनदी (पुणें) — दि. अ. पण्ढरपुरे

ब्रह्मर्षिचरणानां पुण्यस्मरणे तेषां कार्ये सा तेजस्विता, धीरोदात्तता निश्चयशीलता...कति नु कति गुणाः गणनीयाः। सा गुणसाहस्री 'शारदा'-काराणां पाथेयम्। आन्तं यावत् तस्य तेजसः मार्गदर्शनेन कार्यं वा साधयेयं देहं वा पातयेयम् इति व्रतनिर्धारं पुनरेकवारं सविनयं प्रकटी-कुर्मः। अयम् एव श्रद्धाञ्जलिः। नमः शान्ताय तेजसे ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

* *

पाण्डुरोगं तथा रक्तमान्द्यादि शक्तिहीनताम्
दूरीकर्तुं ध्रुवोपायं सेव्यतां रक्तवर्धकम् ॥

र क्त व र्ध क म्

आयुर्वेदीयौषधीनां शास्त्रशुद्धा विनिर्मितिः ।
निःशङ्कं निश्चिता यत्र रसशाला हि सा ध्रुवम् ॥

दी आयुर्वेद रसशाला
पुण्यपत्तनम् ४

शाखा

पुणें-सांगली-कोल्हापुर-बेळगांव-हुबळी-मुम्बई-अमरावती
नागपुर-इन्दौर-जोधपुर-दिल्ली

0 0 0 0 0 0 0 0 0 0 0 0 0 0 0 0 0 0 0 0 0 0 0

खटाऊ भानजी छाटबर, दिवानपारा मार्ग क्र. २, राजकोट–१
इत्येतैः जिताः १७,५०० रूप्यकाः क्र. ३४ स्पर्धायाम् ।

रूप्यकाः ४०,०००
लिट्क्विझ् क्र. ३७ द्वारा जेतव्याः ।

प्रवेशपत्रिकाः रविवासरीयेषु प्रमुखेषु वृत्तपत्रेषु प्रकाश्यन्ते । प्रमुखनगरेषु प्रतिनिधयः सन्ति । स्वीक्रियन्तां तेभ्यः प्राप्तिपत्राणि प्रवेशपत्रिकाः च ।

पत्रेण प्रार्थितं चेत् लिट्क्विझ्-साप्ताहिकं विना मूल्यं प्रेषयामः ।

लिट्क्विझ् प्रायव्हेट लिमिटेड

अलङ्कारः, नालाराममार्गः, मुम्बापुरी ७

१५ भाषासु १०० प्रतिनिधयः १७० वृत्तपत्रेषु विज्ञापनम् ।

* *

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

स्वरवैविध्ये गीतम् एकम्....

अनेक स्वर, एक गीत!



कोटी कोटी लोक, एक देश!

प्रसिद्धि संचालक, महाराष्ट्र शासन, मुंबई.

.... कोटिजनेषु च राष्ट्रम् एकम्।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

' शारदा-'काराणां प्रकट-सत्कार-योजना

पुण्यपत्तनम्— (शारदा-नगर-प्रतिनिधितः)

" संस्कृतिसंस्कृतयोर्मध्ये दीर्घकालं यावत् स्थितम् अन्तरं दूरीकृत्य सुबोध-भाषणेन तथा सुरसलेखनेन संस्कृतं बहुजन-समाजं यावत् प्रापयितुम् अहर्निशं प्रयतनशीलाः पं. गाडगीळ वसन्तरायाः । सामाजिकम् ऋणं प्रत्यर्पयितुम् एतादृशः त्यक्तसर्वस्वः संस्कृतनिष्ठः युवा समये संमाननीयः समाजेन । वार्धक्ये मन्दकर्तृत्वे सत्कारापेक्षया यः विघ्नराशिं समुल्लङ्घ्य सातत्येन क्रियाशीलः, तस्य तरुणस्य तारुण्ये गौरव-समारोहः समुचितः महत्त्वपूर्णश्च । अनेन सत्कारनिमित्तेन सर्व्हंण्टस् ऑफ इण्डिया (भारतसेवक समाज) सोसायटीवत् ' संस्कृत-सेवक-समाजः स्थापितः चेत् तत् कालोचितं भवेत्—" इति निवेदितं महाराष्ट्रराज्य-विधिमण्डलाध्यक्षैः (स्पीकर) **श्री. त्र्यम्बक शिवराम (बाळासाहेब) भारदे** महोदयैः पं. गाडगीळ-मित्र-मण्डलसभायाम् ।

वसन्त. अ. गाडगीळ

' संस्कृतस्य सर्वत्र प्रसारार्थं ' शारदा 'काराः ससमारोहं संमाननीयाः ' इति विचारेण संमिलितैः महाराष्ट्रस्थैः प्रमुखैः संस्कृतनिष्ठैः समाजधुरीणैश्च स्थापिता पं. वसन्तराव गाडगीळ-सत्कार-समितिः । इयं समितिः आगामिनि दीपावली-समारोहे लक्षार्धरूप्यकात्मकं गौरवनिधिं (रू. ५०,०००) समर्पयिष्यति ' शारदा ' कारेभ्यः ससमारोहम् ।

अस्यां सभायां सत्कार-समारोह-कल्पकाः डॉ. माधवराव बक्षी, पं. लक्ष्मीकान्त चक्रदेव, श्री. इसाक कासम, पं. श्री. धुं. कवीश्वर, श्री. त्र्यं. शि. भारदे (सर्वे मुम्बापुरीस्थाः) तथैव डॉ. ह. वि. पाटसकर (पुणें-विद्यापीठ-कुलगुरुः), श्री. शंकरराव थत्ते, डॉ. ल. बा. जोशी, प्राचार्य नी. शं. नवरे, पं. विनायकशास्त्री पराञ्जपे, श्री. वसन्तराव गीत (तरुणभारत-सहसंपादकः), डॉ. शि. द. जोशी, दुर्गादत्त शर्मा, न. गो. अभ्यंकर, अ. वा. आचार्य, प्रभृतयः समुपस्थिताः ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पं. वसन्तराव गाडगीळ-सत्कार-समितिः

अध्यक्षः — डॉ. ह. वि. पाटसकर, पुणें-विद्यापीठ-कुलगुरुः

उपाध्यक्षाः — श्री. त्र्यं. शि. भारदे (महाराष्ट्रविधिमण्डलाध्यक्षः)
श्री. ल. मा. नाडकर्णी (अध्यक्षः बॉम्बे पोर्ट ट्रस्ट)
म. म. प्रा. द. वा. पोतदार (टिळक-विद्यापीठ कुलगुरुः)
श्री. शिवरामपन्त मोडक ('केसरी-'संस्था विश्वस्तः)
सौ. यमूताई किर्लोस्कर (किर्लोस्कर-उद्योग-समूहः)
सौ. जयश्री वैद्य (स्वस्तिक-उद्योग-समूहः)
डॉ. श्री. भा. वर्णेकर (नागपुर-विश्वविद्यालयः)
न्या. बलवन्तराव घाटे (एकनाथ-संशोधन-मन्दिराध्यक्षः)
श्रीमान् रामचन्द्रजी मर्दा (मर्दा मिल्स सोलापुरम्)

कोषाध्यक्षः श्री. शंकरराव थत्ते (उद्यान-प्रासादः)

सरकार्यवाहः श्री. माधवराव बक्षी (मुम्बई)

कार्यवाहाः श्री. इसाक कासम (मुम्बई), श्री. दुर्गादत्त शर्मा,
श्री. फुलचन्द जैन, अरळीकट्टी आचार्य, नामदेवराव मते,
श्री. वा. दा. थत्ते, पं. श्री. धुं. कवीश्वर,
पं. दुर्गाराम उपाध्ये (गोवा), श्री. प्र. पां. जोशी (मुम्बई)
पं. धुण्ढिराजशास्त्री दाते (पञ्चाङ्ग-निर्माता, सोलापुरम्)

सदस्याः श्री. मुकुटराव काकडे, श्री. विठ्ठलराव गाडगीळ,
पं. का. र. वैशंपायन, डॉ. ल. बा. जोशी, पं. ल. म. चक्रदेव,
दाजी भाटवडेकर, पं. वि. वा. परांजपे, डॉ. शि. द. जोशी,
वसन्तराव गीत, श्रीसाम्बशिवराव, ए. नटराजन्,
श्री. शंकरनारायण. श्री. बाळकृष्ण व्यास (सोलापुरम्)
सौ. सुशिलाताई आठवले

मुम्बापुरी कार्यालयः
१५३, पवनविहारः
माटुङ्गा-मुम्बापुरी १९
दूरवाणी – क्र. ४४१६०३

पुण्यपत्तने कार्यालयः
'उद्यान-प्रासादः'
१७१२।१ब सदाशिव
पुण्यपत्तनम् २
दूरवाणी–क्र. ५७४९१

अनेन संकेतेन धनादेशेन चेक-ड्राफ्टद्वारा वा सत्कृतिद्रव्यं प्रेष्यताम् ।

सरकार्यवाहः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

वैशम्पायन उवाच

मया विद्युत्-सहायेन संदेशः प्रहितो मुदा ।
पठिता वृत्तपत्रेषु भवत्-सत्कारयोजना ॥१॥
स्वयंस्फूर्तिर्हि भवतो देवभाषा-प्रसारणे ।
व्यवसायं नौदरिकं जानाति हि भवान् सदा ॥२॥
"अनन्तस्य वसन्तोऽयं सुपुत्रः शोभते खलु" ।
वयस्येभ्यो मम सदा कथयामि समन्ततः ॥३॥
भवता मे परिचयः "टिळको युगपूरुषः" ।
संकेतोऽयं भवच्चित्ते स्थिरोऽस्ति नहि विस्मृतः ॥४॥
सुभाषचरितं लेख्यं श्लोकबद्धं मतिर्मम ।
लेखकोऽस्य भवान् भूयात् सहकार्यं सदैव मे ॥५॥
सरला देवभाषास्य चरितस्य प्रभाविनी ।
भवद्व्रतस्य संपूर्तिरुज्ज्वलेति मतिर्मम ॥६॥
ऋतुराजो वसन्तस्त्वं ऋतुराजत्वमीहसे ।
तदर्थं देवभाषायां कार्या वाङ्मयनिर्मितिः ॥७॥
भवत्-सत्-कारसमये समीहे मदुपस्थितिम् ।
अशक्यं यदि तद् भूयादिदं मे पत्रकं शुभम् ॥८॥
वसन्तस्त्वं कृतान्तोऽसि देवभाषाविरोधिनाम् ।
कृतान्तो दुःखदो नित्यं वसन्तः सुखदः सदा ॥९॥

११७ 'कवि'-प्रासादः
दिल्लीमहाद्वारप्राङ्गणम्
नगरम्

गुणज्ञदेवभाषाभक्तः
का. र. वैशम्पायनः
दि. २२-७-६८

गार्ग्य उवाच

प्राप्य वैद्युत-संदेशं प्रापि मोदः सुदुर्लभः ।
वैशम्पायनसंदेशः प्रसादः खलु संस्कृतः ॥
सुबोधं संस्कृतं सेव्यं जीवनस्य व्रतं मम ।
त्यक्तसर्वस्ववृत्त्या तत् सश्रद्धं परिपाल्यते ॥
जगन्नाथरथस्यास्य वाहनं कठिनं परम् ।
सर्वेषां सहकार्येण सुलभं तद् भविष्यति ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

सर्वेषाम् अविरोधेन कार्यं कर्तुं समुत्सहे ।
अनिवार्य-विरोधस्तु निवार्यः कथ्यतां कथम् ॥
सोढ्वा विरोधपाषाणान् सनिर्धारं सनिश्चयम् ।
शारदाम्बा-प्रसादेन प्रवृत्तिर्मे पुरः सदा ॥
मित्रोत्तमैर्भवादृक्षैः साहाय्यं यदनुष्ठितम् ।
समये समये तत्तु विस्मर्तुं नैव शक्ष्यते ॥
नाम्ना वसन्तशर्माऽहं ग्रीष्मः प्रातिभलेखने ।
'सुभाषम्' अक्षरीकर्तुं नैव नैवाक्षरप्रभुः ॥
वैशम्पायनगाथायां मुद्रितायां च सत्वरम् ।
लेख्यं तद् भवता काव्यं सुभाषचरितं नवम् ॥
'**कल्याण**'स्थकविश्रेष्ठैः **श्रीछत्रे**-वंश-भूषणैः ।
'सुभाषचरितम्'-नाम महाकाव्यं प्रकाशितम् ॥
पठितं तद् भवेद् भवता नो चेत् तत् पठ्यतां ध्रुवम् ।
सुबोधं सुरसं काव्यं युक्तकाले प्रकाशितम् ॥

वैशम्पायन-गार्ग्य-संवादः

सातारा नगरे रम्ये पण्ढरीनाथ **पाठकः** ।
गान्धीसुभाषप्रभृतीन् उद्दिश्य कवितां गतः ॥
नियामकसदस्योऽयं विद्यापीठे भवादृशः ।
नैकवारं सभाकार्ये दृष्टः स्याद् भवता मुदा ॥
सुभाषम् अक्षरीकर्तुं पुनर्यत्नः सदा भवेत् ।
पौनःपुण्येन गेयानि चरितानि महात्मनाम् ॥
पुण्येयं नगरी रम्या गुणपूजनतत्परा ।
परमाणुं नगीकृत्य सदा सत्कर्तुमिच्छति ॥
तत्रैवेयं वराकस्य कापि सत्कारयोजना ।
वसन्तसंस्कृतैर्मित्रैः सत्वरं निश्चितीकृता ॥
सर्वत्र संस्कृतं नेतुं वाचा पत्रेण वा सदा ।
सर्वोपकारकत्वेन सानन्दं संमता मया ॥
लक्षार्धं रूप्यकाणां यद् गौरवार्थं प्रदित्स्यते ।
संस्कर्तुं स्वसमाजं तत् सुखं समुपलप्स्यते ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

योगोऽयं कपिलाषष्ठीत्वेन सत्यं मतो मया ।
शारदाम्बा प्रसन्ना चेत् भुवि किं वद दुर्लभम् ।।

उद्यानेति सुविख्याते प्रासादे पुण्यपत्तने ।
कार्यालयः सुसंपन्नः शारदायाः कृते नवः ।।

सुखासनं समारुह्य विद्युद्दीपे प्रशान्तिदे ।
देवे वर्षति सर्वत्र सामोदं लिख्यते मया ।।

थत्ते शंकररायाख्यः प्राप्तः सुहृदनुत्तमः ।
यस्य मैत्रसुवर्णस्य सौगन्ध्यमिदमुत्तमम् ।।

शृङ्गेरीशारदाम्बाश्रीरत्रैव न्यवसत् पुरा ।
गते कार्तिक-पूर्वार्धे शरदिन्दुसुशोभिते ।।

तन्मङ्गलक्षणे मैत्रम् आवयोर्यत् सुगुम्फितम् ।
'शारदा' तद् ध्रुवं कुर्याद् यावच्चन्द्रदिवाकरौ ।।

येन येन हि मार्गेण संस्कृतं सुलभीभवेत् ।
तेन तेनैव मार्गेण गन्तुं मे सिद्धता सदा ।।

न त्वहं कामये सोमं मदिराक्षीं युगोचिताम् ।
कामये भुवि सर्वत्र संस्कृतस्य प्रसारणम् ।।

भुवि वा दिवि कुत्रापि दिवा स्वप्ने कदापि वा ।
संस्कृतं जीवनं भूयात् किम् अमृतमतः परम् ।।

२३ जुलै १९६८ गार्ग्यः वसन्तशर्मा

स्मर्यताम् राष्ट्रदेवो भव त्वर्यताम्

राष्ट्ररक्षणार्थम् .... बलसंवर्धनम्
बलसंवर्धनार्थम्.......मिष्टान्नसेवनम्

सर्वोत्कृष्टमिष्टान्नार्थं सत्वरं द्रष्टव्याः

दूरवाणी] शर्मा स्वीट मार्ट [७२३२
दत्तमन्दिरसमीपे पुणे२.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

संस्कृत–प्रधान–माध्यामिकाविद्यालयस्य योजना

(सामान्यतः वर्षाणां पञ्चविंशतेः प्राक् महाराष्ट्रेषु नैकत्र संस्कृत-पाठशालाः सुस्थितकल्पा अवर्तन्त । अद्यापि ताः नाममात्रं विद्यन्ते । तत्र पाठशालासु प्राचीनानां ग्रन्थानां सङ्ग्रहः, निसर्गरमणीयानि आवासस्थानानि, न्यूनाधिकतया द्रव्यसंचयः, तथा च सर्वेभ्योऽप्येतेभ्यः श्रेष्ठं धनं, तत्र तत्र परिसरे चिराय निवासिनां विदुषाम् अविदुषामपि जनानाम् अकृत्रिमः आदरभावः अद्यापि विद्यते । तत्रस्थानां जनानां बहून् संवत्सरान् संस्कारयित्री सा संस्था भविष्यति कालेऽपि तथैव कार्य-परा संवर्धताम् इति तत्रस्था जना नितरां स्पृहयन्ति । तदर्थं च स्वशक्तिम् अनुसृत्य साहाय्यं कर्तुमपि ते सिद्धा वर्तन्ते । साधनसमुच्चयोऽयमद्यतन्यां शिक्षणपद्धत्याम् उपयोगितामानेतुं शक्यम् । संस्कृतशिक्षायाः प्राचीनायां प्रणाल्यां ये केचन गुणविशेषाः सन्ति ते सांप्रतम् अपि कियताप्यंशेनो-पकारहेतवो भवेयुरिति ध्रुवम् । एतत् लक्ष्यीकृत्य टिळक-महाराष्ट्र-विद्यापीठेन गतायां वर्षविंशत्याम् अविरतं प्रयत्यते । एते च प्रयत्ना इत उत्तरमपि प्रचलिष्यन्त्येव । तेषां प्रयत्नानामत्र संक्षेपतः किञ्चिन्निदर्शनं कृतं विद्यते ।)

सद्यःस्थितौ संस्कृतपाठशालाः अधिकतरम् उपयुक्ता भवन्तु, तत्र शिक्षमाणाः छात्रा अन्यत्र शिक्षमाणा विद्यार्थिन इव संस्कृतादन्ये ये आवश्यका विषयाः तेषामपि यथायथं परिचिता भवन्तु तेनच व्यवहारेऽपि ते अन्येषु विषयेषु अधीतिनः छात्राः इव महत्साफल्यं विन्दन्तु तथा च अन्येषां विषयाणामध्ययनेन तेषां विचारसरणिः विशालतामाप्नोतु इति उद्दिश्य कानाप्युचितानुपायान् बोधयितुं मुम्बई–सर्वकारेण १९४९ वर्षे एकः पाठशाला–आयोगो नियुक्त आसीत् । तेन चायोगेन एवं स्वाभि-प्रायः प्रकटीकृतः—' संस्कृतप्रधानः माध्यामिकोऽभ्यासक्रमः नूतनतया प्रस्तोतव्यः तस्य च अभ्यासक्रमस्यान्तिमा परीक्षा एस्. एस्. सी. परीक्षामण्डलेनैव प्रचालनीया । संस्कृतेतरा आवश्यकविषयाः एस्. एस्. सी. परीक्षायां विद्यमानानां विषयाणां समानमाना भवन्तु । सोऽभ्यास-क्रमः पाठशालाभिरध्यापनीयः येन ताः पाठशालाः केवलं स्वकीयान् (बोनाफाईड्) छात्रान् लब्धुं समर्था भवेयुः । तासु पाठशालासु अधी-यानाः छात्रा अपि भविष्यति काल अध्ययनार्थं व्यवसायार्थं वा अन्य-विद्यार्थिन इव स्वकीयगुणाननुसृत्य उचितमवसरं प्राप्नुयुः ।'

भारतसर्वकारेण १९५६ वर्षे संस्कृतविद्यायाः संरक्षणं संवर्धनं च इत्यादिविषयेषूपायान् बोधयितुमेकः संस्कृतायोगः नियुक्त आसीत् ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

तेन आयोगेन नैकाः पाठशालाः प्रत्यक्षीकृत्य, पाठशालाचालकैः सह विमृश्य संस्कृतप्रधानमाध्यमिकविद्यालयं लक्ष्यीकृत्य स्वकीये वृत्तान्ते २५१ पृष्ठे अभिप्रायः आविष्कृत :—

(दि कमिशन रेकमेण्ड्स्-दॅट् दि पाठशालासिस्टीम शुड् बी रीव्हायटलाईज्ड् बाय रीऑर्गनायझिङ्ग दि पाठशालाकोर्सेस वुइथ दि इण्ट्रॉड्क्शन इन देम् ऑफ सम् मॉडर्न सब्जेक्ट्स् लाईक दि मदर टङ्ग्, इङ्ग्लिश, जनरल सायन्स् इन्क्लयूडिङ्ग मॅथेमॅटिक्स् अॅण्ड सोशल स्टडीज् इन्क्लयूडिङ्ग एन्शन्ट इण्डियन हिस्टरी अॅण्ड कल्चर, अॅडेक्वेट् केअर बिइङ्ग टेकन् टु सी दॅट् धिस् इण्ट्रॉडक्शन ऑफ दि मॉडर्न सब्जेक्ट्स् इज् नॉट् रिझल्ट् इन लोअरिङ्ग दि स्टॅण्डर्ड ऑफ पण्डित स्कॉलरशिप्स् दॅट् दीज् रेकग्नाईज् संस्कृत हायस्कूल्स् ऑर रीमॉडेल्ड पाठशालाज् वुइथ देअर स्टूडण्ट्स् स्टॅडिङ्ग मेनली संस्कृत (फॉर नॉट् लेस दॅन् १६ पीरिअड्स् ए वीक्) अॅण्ड ऑल्सो सम् मॉडर्न सब्जेक्ट्स् अॅज् इण्डिकेटेड् अबौ, शुड् बी ऑन पार्ट वुइथ आदर हायस्कूल्स्, अॅण्ड देअर प्रॉडक्ट्स् बी ट्रीटेड लाइक एस्. एस्. एल्. सी. स्टूडण्ट्स् फॉर परपजेस् ऑफ एम्प्लॉयमेण्ट ऑर अॅडमिशन् टू फरदर कोर्सेस् ऑफ स्टडी.)

मुम्बई-सर्वकार-नियुक्तम् आयोगं प्रति तथा च भारत-सर्वकार-नियुक्तम् आयोगं प्रति टिळकमहाराष्ट्रविद्यापीठेन याः सूचनाः प्रेषिताः समक्षं वा चर्चासमये उपन्यस्ताः तासु संस्कृतमाध्यमिकशालायाः सूचना प्रधानत्वेनावर्तत ।

न केवलं संस्कृतपाठशालाशिक्षणपद्धत्यां नूत्नानां विषयाणाम्-आधिक्येनालं, किन्तु तासां व्यवस्थापनं, परीक्षापद्धतिः इत्यादि सर्वमेव प्रचलितशिक्षणपद्धत्या एकरूपतां नेयम् । अन्यथाऽस्याः प्राणाल्याः भिन्ने प्रवाहे यथाकथंचित् क्षीणतया जीवति अपि तत्रत्या विद्यार्थिनः नूत्नाच्चण्डप्रवाहात्सर्वथा दूरवर्तिनो भवेयुः, ततश्च कातरा वाऽहंमन्या भवेयुः । एतादृश्या पृथक्तया प्रथमतः एव संकुचितं सदिदं संस्कृत-विद्यार्थिजगत् अधिकतरमेव संकुचितताम् आप्नुयात् । तेषां छात्राणां विचाराणां विशालीकरणं तथा अन्येषाम् अपि मतानि वर्तन्ते तान्यपि विचारार्हाणि इति तैर्मन्तव्यम् । एतत् सर्वम् असाध्यं वा भवेत् । (नूत्नायाः गतिशीलायाः शिक्षाप्रणाल्याः केषांचन अपरिहार्याणां दोषाणामापत्तिभये विद्यमानेऽपि) एतान् दुष्परिणामान् परिहर्तुं तयैव शिक्षा-पद्धत्या मर्यादिततया ऐकरूप्यं स्वीकर्तव्यम् । एतदेवोद्दिश्य एताः संस्कृत-पाठशालाः तत्र तत्र प्रान्ते वर्तमानासु माध्यमिकशिक्षा-प्रणालीषु समा-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

* संस्कृताभ्यासार्थम् अवश्यं संग्राह्या *
पं. वामन वेङ्कटेश आपटे—विरचिता
पाठ्यव्याकरणदीपिका
पृष्ठसंख्या १५० मूल्यम् रु. १–२५
प्राप्तिस्थानम् 'शारदा-' कार्यालयः ४२५ सदाशिव, पुणे २

वेश्यन्तां, पाठशालाभिरपि च नूत्नाया अध्यापनपध्यत्याः विषये सर्वथा औदासीन्यं त्याज्यं येन सर्वथा स्वायत्तानां छात्राणां दुर्लभत्वं–वस्तुतः शिक्षालयानां दारिद्र्यमिदं शाप इव दुनोत्यधुना–नश्येत् ।

वर्षत्रयात् प्राक् केरळस्थाः आनन्दतीर्थस्वामिनः पुण्यपत्तनमागताः टिळक-महाराष्ट्र-विद्यापीठेन प्रचालितानि श्रीबालमुकुन्दसंस्कृत-महाविद्यालयं:, संस्कृत-ग्रन्थालयः अन्यानि कार्याणि च द्रष्टुमाहूता आसन् टिळकविद्यापीठे । तत्र तेभ्यः स्वायत्तानां विद्यार्थिनां सार्वकालिकमिदं दुर्लभत्वं निवेदितम् । तदा केरळस्थानां पाठशालानाम् इदानींतनीं स्थितिमनुसृत्य स्वामिनः निवेदितवन्तः– 'नचिरादेव कालात्प्राक् एतादृशमेव तत्र छात्राणां दुर्लभत्वमासीत् । किन्तु तत्रत्येन माध्यामिक–शिक्षा–मण्डलेन प्रधानतः संस्कृतमितरे च केचन आवश्यका विषया इतरैः समप्रमाणा इत्येवं नूत्नोऽभ्यासक्रमः संस्कृतपाठशालानां कृते निश्चितः । पाठशालाभिः तमभ्यासक्रमम् अनुसृत्य अध्यापनं प्रारब्धं, तदा प्रभृति च पाठशालानामुत्कर्ष एव परिणतः । तासां पाठशालानां तत्रत्यस्याभ्यासक्रमस्य च सम्पूर्णतया ज्ञानार्थं तादृश्याः कस्याश्चन पाठशालायाः सञ्चालकाः प्रार्थिताः । चित्तूरस्थाया एतादृश्या पाठशालाया आगतस्य पत्रस्य गुर्वर्थो भागः प्रस्तुतोपकारी इति अत्र दीयते ।

(अवर स्कूल अॅट् चित्तूर ५ माईल्स् फ्रॉम आश्रम ईज् कॉल्ड् 'वेदशास्त्रपाठशाला संस्कृतहायस्कूल.' रेकग्नाईज्ड् अॅण्ड एडेड बाय केरळ गव्हर्नमेण्ट. देअर आर १५ सच् हायस्कूल्स् (संस्कृत) इन अवर स्टेट मॉडेल्ड् आफ्टर अवर्स. दि स्टूडण्ट्स् इन दीज् स्कूल्स् आर कोच्ड् फॉर स्टेट एस्. एस्. सी. एक्झॅमिनेशन, वुइच् एन्-टायटल्स् देम् टु गेट अॅडमिशन् टु प्री. युनिव्हर्सिटी क्लास् इन एनी कॉलेज्. देअर आर ११ पेपर्स फॉर दि एस्. एस्. एल्. सी. ऑफ दीज् ९ पेपर्स आर् कॉमन टु संस्कृत हायस्कूल् अॅण्ड दि ऑर्डिनरी हायस्कूल अॅज् शोन—

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

इङ्ग्लिश २ पेपर्स	७ पीरियड्स्	कम्पल्सरी
हिन्दी १ पेपर	३ ,, ,,	
एलेमेण्ट्री मॅथेमॅटिक्स २ पेपर्स	५ ,,	
,, सायन्स ,,	५ ,,	
सोशल् स्टडीज् ,, ,,	५ ,,	
टोटल् कॉमन पेपर्स ९	२५ ,,	
संस्कृत २ पेपर्स	१०	
टोटल् ११ पेपर्स	३५	

संस्कृतपाठशालानां विषये सर्वकारस्य मार्गदर्शिनी एका संस्कृत-पाठशाला-समितिः महाराष्ट्र-सर्वकारेण नियुक्ता वर्तते। अनयाऽपि समित्या एतादृगेव एकोऽभ्यासक्रमः महाराष्ट्र-सर्वकारं प्रति सूचितो वर्तते। भारत-सर्वकारस्य शिक्षामन्त्रालयेन एतं विषयमधिकृत्य एकः सामान्यरूपः अभ्यासक्रमः सर्वेषु प्रान्तेषु याः प्राचीनपद्धत्या अध्यापयन्त्यः शिक्षणसंस्थाः वर्तन्ते ताः प्रति विमर्शार्थं प्रेषितः। आपाततः अभिन्ना अपि एतेऽभ्यासक्रमाः अनेकधा भिन्नाः। कैश्चन तावत् आङ्ग्लभाषा न समाविष्टाऽत्र, अन्यैः कैश्चन गणितं त्यक्तम्। संस्कृतं विशिष्य जिज्ञासूनां कृते अद्यतने काले तावत् आङ्ग्लभाषायाः उत्तमं ज्ञानमावश्यकमेव। संस्कृतवाङ्मयविषये विदेशीयानां विदुषां विचाराणां ज्ञानार्थम् आङ्ग्लभाषा एव मुख्यं द्वारम्। अतः अन्ये के विषयाः कति प्रमाणाः च इति विषये यदि भिन्नमतत्वं स्यात्तथापि संस्कृतप्रधाने अभ्यासक्रमे आङ्ग्लभाषायाः स्थानम् अपरिहार्यमेव।

उपर्युल्लिखिताः सर्वेऽभ्यासक्रमाः, तद्विषयेऽनुभववृद्धानामभिप्रायाः, संस्कृतस्य वर्तमानाऽवस्था तथा च भविष्यत्कालस्यावश्यकता इति सर्वमिदं विमृश्य टिळक-महाराष्ट्र-विद्यापीठेन संस्कृत-प्रधान-माध्यमिक-अभ्यासक्रमः आलेखितो वर्तते। अयम् आलेखः महाराष्ट्र-सर्वकारस्य शिक्षा-विभागं माध्यमिक-शिक्षा-मण्डलं च प्रति विमर्शार्थं तथैव च सत्वरं कार्यान्वितितां यात्विति उद्दिश्य प्रेषितः वर्तते। विषयेऽस्मिन् सर्वकारस्य शिक्षामन्त्रालयः सादरं विमर्शपर इति श्रूयते। अभ्यासक्रमोऽयं युक्ततया कार्यान्वितो भवत्वित्यपेक्ष्यते।

पुरा मॅट्रिकपरीक्षार्थं संस्कृतस्य पाठ्यपुस्तकं नासीत् अतः तदर्थम् अध्ययनपराः छात्राः संस्कृताध्ययनं समीचीनतया कुर्वन्ति स्म। तदनन्तरं कान्यपि वर्षाणि यावत् पाठ्यपुस्तकान्यपि वैविध्यपूर्णानि प्रौढानि च आसन्। परमनन्तरं सार्वत्रिक-शिक्षा-प्रसारार्थं तानि क्रमशो नितरां सुबोधानि सञ्जातानि। अतः अधुना संस्कृतम् अधीत्य एस्. एस्. सी.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

राष्ट्रदेवपूजनार्थं बलोपासनम् । बलोपासनार्थं सात्त्विकान्नसेवनम् ।

तदर्थं त्वर्यताम्

का का ह ल वा ई

१ दत्तमन्दिरम्, शुक्रवार-पुणें २ २ डेक्कन-जिमखाना, पुणे ४.
दूरवाणी ५७८६८ दूरवाणी ५७८६७

परीक्षां समुत्तीर्णा विद्यार्थिनः शब्दसङ्ग्रहः, व्याकरणं, वाक्यरचनाज्ञानम् इत्यादि आवश्यकं यद् भाषिकं ज्ञानं तत्र दृढाधीतिनः न एव भवन्ति । नेदृशम् अपरिपक्वं भाषाज्ञानं साधुः मूलाधारो भवितुं शक्नोति विचार-प्रधानस्य रसग्रहणात्मकस्य च महाविद्यालयीनस्याध्ययनस्य । अस्मात् संस्कृतं प्रधानत्वेन स्वीकृत्य बी. ए. परीक्षां समुत्तीर्णानां विद्यार्थिनां भाषायां विचारविभवे अपि दारिद्र्यमेव बहुशः परिणमति । अतः ते माध्यमिक-विद्यालयेषु तथाध्यापयितुं न प्रभवन्ति यथा नूतनानां विद्यार्थिनां संस्कृताध्ययने रुचिः उत्पद्येत । विद्यापीठ-सूचितेऽभ्यासक्रमे कोषः, व्याकरणं वाङ्मयं चैतेषां यथोचितं समावेशोऽस्ति, यतः संस्कृताध्ययने कोषव्याकरणयोः महत्त्वम् असाधारणं विद्यते ।

संस्कृत-माध्यमिक-अभ्यासक्रमे संस्कृतं कियन्मात्रं स्यात्, सप्ताहस्य कियान् समयः संस्कृताध्यापनार्थम् उपयोज्यः, अन्ये के विषया आवश्यका ऐच्छिका वा वर्तन्ताम् इतीदं तावत् सविस्तरं विमर्शनीयं तथा च किञ्चित् परिस्थितिसापेक्षं रुचिसापेक्षं वा विद्यते अतः परिस्थितिम् अनुसृत्यैव तद्विद्वद्भिः निर्णेयम् । किन्तु संस्कृतेतराणामावश्यकानां विषयाणां प्रमाणम् अध्यापनसमयश्च तां तां कक्षाम् अनुसृत्य अन्यैः माध्यमिक-विद्यालयैः समः अन्तिमे वर्षे च एस्. एस्. सी. परीक्षायाः अभ्यासक्रमेण समः स्यात् । इति अवश्यम् अङ्गीकर्तव्यम् ।

एतस्मिन् संस्कृत–माध्यमिक–विद्यालये अधीत्य एस्. एस्. सी. परीक्षामुत्तीर्णो विद्यार्थी महाविद्यालये वाङ्मयविभागे अध्येतुं (आर्टस्) योग्यो भवेत् । इतरेभ्योऽधिकं संस्कृतं जानानः सः हिन्दी, महाराष्ट्री इत्यादिषु भारतीयभाषासु तथैव आङ्ग्लीसदृशायांपरकीय-भाषायामपि शीघ्रम् अधिकां निपुणतां प्राप्तुं शक्नुयात् । भाषाप्रवीणत्वाच्च सः सर्व-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

कारस्य अथवा स्वतन्त्रोद्योगानां व्यवस्थापकीय विभागे (अॅडमिनिस्ट्रेशन) अधिकतरम् उपयुक्तो भवेत् । यतः इदानीतने काले व्यवस्थापने प्रादेशिकभाषैव प्राधान्येन प्रयुक्ता स्यात् इति शासनेन तथैव प्रजाभिरपि चापेक्ष्यते । तथैव अधुना क्रमेण सर्वः एव प्रादेशिकः व्यवहारः प्रादेशिकभाषासु, भारतीयः व्यवहारः च राष्ट्रभाषायां भविष्यति । अनया शिक्षापद्धत्या पाठितः छात्रः आलेखनं (ड्राफ्टिङ्ग) शुद्धलेखनम् इति विषये इतरेभ्यः सर्वथा योग्यः स्यात् ।

संस्कृतवाङ्मयं तथा च व्याकरणम् इति द्वयमपि युक्ततया जानन् अयं विद्यार्थी शिक्षाशास्त्रोपाधि (टीचर्स डिप्लोमा) परीक्षार्थं संस्कृतम् अध्यापनविषयत्वेन स्वीकर्तुम् अनुमन्तव्यः भवेत् । माध्यामिकविद्यालये सामान्यसंस्कृतमध्यापयितुं च सः समीचीनतया प्रभवेत्। अधुना माध्यमिकविद्यालयेषु विशेषतः ग्रामीणभागे संस्कृताध्यापका दुर्लभा वर्तन्ते । अनेन च तेषां दुर्लभत्वेन पालकाः, विद्यार्थिनः तथा च संस्थाचालकाः संस्कृतमिच्छन्तोऽपि स्वकीये विद्यालये एकादश्यां कक्षायां संस्कृतम् अध्यापयितुम् अध्येतुं वा न शक्नुवन्ति । अथवा संस्कृताध्यापनार्थम् अपात्रे कस्मिंश्चित् अध्यापके संस्कृतमध्यापयति विद्यार्थिनां संस्कृते रुचिर्नोत्पद्यते । एतादृश्यः दुरवस्थाः अनया योजनया अंशतः नश्येयुः । अनया योजनया कृताध्ययनाः छात्राः माध्यामिकशिक्षणविभागे संस्कृतप्रसारार्थं ध्रुवम् एवोपयुक्ता भवेयुः इति सुदृढं विश्वसिमः ।

एवंविधे संस्कृतप्रधाने माध्यमिकेऽभ्यासक्रमे सर्वकारेणानुमते सति तत्र तत्र वर्तमानाभिः पाठशालाभिः तादृशाः माध्यमिकविद्यालयाः स्वतन्त्रतयाऽथवा स्थानिकविद्यालयानां सहकार्येण प्रचालनीयाः । प्रतिमण्डलम् अवरतः (डिस्ट्रिक्ट) एकः संस्कृतप्रधानः माध्यमिकविद्यालयः स्थापनीयः । सर्वमिदम् अस्या योजनायाः सर्वकारस्य मान्यतामवलम्बते, अतः अत्र विषये टिळक-महाराष्ट्र-विद्यापीठं प्रयत्नशीलम् एव स्यात् । अस्मिन् कार्ये शिक्षासंस्थाः, शिक्षणतज्ज्ञाः, शिक्षारुचयः प्रजाः च इत्येतेषां समेषाम् एव सहकार्यं विद्यापीठेनापेक्ष्यते ।

श्रीबालमुकुन्दसंस्कृतमहाविद्यालयः
टिळकमहाराष्ट्रविद्यापीठम्
पुण्यपत्तनम् २

श्री. वामनशास्त्री भागवत
अधिपतिः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

कवळे (गोमन्तक) शाङ्करपाठशालायां ब्रह्मर्षि सातवळेकर-महाभागेभ्यः श्रद्धाञ्जलिः

कवळे (फोण्डा-गोमान्तक) — दि. १ ऑगस्ट

लोकमान्य तिलकमहोदयानां पुण्यस्मरणं शांकर-पाठशालायां गुरुवर्याणां पण्डितप्रवराणां श्रीमतां दत्तात्रेयशास्त्रि-साधले महाशयानामाध्यक्ष्ये सुविहितम् । अस्मिन्नेवावसरे वेदमहर्षेः तपस्विनः सातवळेकरोपाह्वस्य स्वर्गगमनविषये प्रथमतः शोकप्रस्तावः संमानितः । ब्रह्मस्वरूपे विलीनानां गुणगौरवपराः जीवन-परिचयकारिणश्च भावपूर्णाः श्रद्धाञ्जलयः पं. साधलेशास्त्री पं. ग. ल. दाण्डेकर (काव्यतीर्थ) प्रभृतिभिः विद्वद्वरैः वितीर्णाः । अन्ते च निमिषैकं यावत् स्तब्धताम् आश्रित्य मूकश्रद्धाञ्जलिरपि समर्पितः ।

भोः वेदमूर्ते चतुर्वेद्यर्थ-प्रतिपादनलब्धकीर्ते वेदमहर्षे, चित्रकार, छायाचित्रकार, व्यासोपम सातवळेकरोपाह्व, दामोदरात्मज, श्रीपाद, अद्य अस्मान् सर्वान् त्यक्त्वा स्वर्गं गतो भवान् ।

भवदीयम् एतादृशं विविधशाखान्वितं शास्त्रपूतं निर्मलाचारयुक्तं बुधबुद्धिवर्धकम् एकाधिकैकशतसंवत्सरात्मकं दीर्घायुष्यं तरुणानामपि स्फूर्तिदायकम् अभूत् ।

परं भवतः स्वर्गगमनेन वयम् सर्वे शोकाकुलाः शोकसागरे निमग्नाः । भवत्सदृशः लोकोत्तरपुरुषः अस्माकं भारते देशे समुत्पन्नः इति भूषणास्पदं अस्मद्देशस्य । परम् अद्य तद् भारतमातुः भूषणम् अपहृतम् । भवतः स्वर्गगमनेन अस्मद्देशस्य महती हानिः समभूत् ।

एतादृशं स्वावतारकार्यं समाप्य स्वर्गपुरीम् अधिष्ठितवता भवता पाथेयस्वरूपम् अस्मदीयं श्रद्धाञ्जलिपुटमिदं स्वीकर्तव्यम् ।

नमोऽस्तु ते प्राज्ञ विशालबुद्धे
विचार्य संशोधितवेदशास्त्र ।
येन त्वया सुष्ठु विकासपूर्णः
संवर्धितः संस्कृतिपादपोऽयम् ।।

(कै. सातवळेकराणां ये संबन्धिनः पुत्रपौत्रकलत्रदुहितृसुहृदाद्याः तेषां दुःख-सागरे वयं सर्वे समदुःखभाजः स्मः ।)

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

अनन्तरं लोकमान्य टिळकपुण्यतिथि-निमित्तं छात्राणां पं. गणपति दांडेकर महाभागानां च टिळकमहाभागानां जीवन-स्मारकानि गुण-संकीर्तन-पराणि च व्याख्यानानि अभूवन् ।

अध्यक्षमहाशयैस्तु स्वीये भाषणे कथितम्-" छात्रैः केवलं टिलक-महाभागानां गुणसंकीर्तनेनैव संतृप्तैर्न भाव्यम् । किन्तु टिळकमहाशयानां गुणानुकरणे अत्यर्थं प्रयतितव्यम् । दुर्गुणानाम् अपाकरणे च कृते सति यूयं सर्वेऽपि लोकमान्य-टिळक-सदृक्षाः पण्डितमान्या विश्वमान्याश्च निश्च-प्रचं भवेयुः इति दृढं विश्वसितव्यम्, अविरतं च प्रयतितव्यम् अनलसैः सद्भिः। टिळकमहाभागा इव विश्वबन्धोः भारतललामभूताः भारत-तिलकाः भवत । केसरिणः भवत । अयमेव मे भवद्भ्यः आदेशः । एष उपदेशः । अमुं संततं स्मरत, चरत च । नान्यः पन्था अयनाय विद्यते । अनेन पथा एव आत्मोन्नतिं, राष्ट्रोन्नतिं, विश्वकल्याणं च यूयम् साध्नुयुः। अयमेव मे अस्मिन् पुण्यदिने युष्मान् प्रति संदेशः इति । "

गुरुकुलेषु छात्राणां दैनन्दिनपाठार्थम् अत्युपयुक्ता

पृष्ठसंख्या २१३) **पाठ्यमञ्जूषा** (मूल्यम् रु. १-५०

०प्रातःस्मरणम् ०ब्रह्मामुरारिस्तोत्रम् ०भूपालीसंग्रहः ०शारदादिस्तवनम् ०सूर्यनमस्कारमन्त्रः ०त्रिसुपर्णम् ०पुरुषसूक्तम् ०प्रातःसन्ध्या ०मङ्गलाभ्य-र्थनम् ०सरस्वतीसूक्तम् ०प्रबोधस्तोत्रम् ०श्रीसमर्थवाङ्मयम् ०श्रीरामरक्षा ०गङ्गाष्टकम् ०षट्पदी ०मानसपूजा ०शिवमहिम्नःस्तोत्रम् ०गङ्गा लहरी ०गोविन्दाष्टकम् ०साधनपञ्चकम् ०चर्पटपञ्जरिका ०परापूज ०नवग्रहस्तोत्रम् ०गीतामृतम् ०केकावली इ.

सत्वरं प्रेष्यतां शारदा-वार्षिक-मूल्यं रू. ८=००

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ भाषासु मधुरा दिव्या पवित्रा सुरभारती ॥

शर्करा

गृहोपयोगाय ... निर्यातकरणाय

भारतराष्ट्रे
शर्करानिर्मातृषु
प्रति-एकरक्षेत्रम्
इक्षु-निर्माणे
शर्करानिर्माणे
च
अग्रत:सराणाम्
अ स्मा क म्
राष्ट्रोत्कर्षे
राष्ट्रविभवे
च
श्रे यो भा गि ता
अ भि माना स्प द म् ।

गोदावरी-शर्करा-कर्मान्तः मर्यादितः

(दि गोदावरी शुगर मिल्स लि.)

* * *

कार्यदर्शि-प्रतितिधि:—

के. जे. सोमय्या अँण्ड सन्स प्रायव्हेट लिमिटेड
फाजलभॉय बिल्डिङग फोर्ट
महात्मा गान्धी-मार्ग:, मुम्बई १

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

किमर्थं निराशा श्वेतकलङ्केन

अस्माकं सुपरीक्षिता आयुर्वेदीया "अमृतबूटी" श्वेत-कलङ्क-विषये पूर्णलाभकरी १९४६ खिरस्ताद्वाद् आरभ्य विश्वविख्याता। अनया दिनत्रयेण एव कलङ्कवर्णान्तरं प्रारभ्यते। एतावति प्रदीर्घ- कालखण्डे (१९४६-१९६८) सहस्रैः अस्याः लाभः गृहीतः प्रशंसापत्राणि च कतिपयः प्रेषितानि। रोगविवरणेन सहैव पत्रं लिखित्वा दिव्यौषधस्य तेजस्विता साक्षात्-क्रियताम्। प्रत्येकस्य रुग्णस्य कृते प्रचारार्थम् एक-फायल-पर्याप्तम् औषधं विनामूल्यं प्रेष्यते।

संग्रहस्य समर्यादत्वात्

त्वर्यताम् * औषधं स्वीक्रियताम् * स्वर्णक्षणः साध्यताम् *

(विशेष सूचना :– दक्षाः भवत मिथ्यानुकरणात्।)

किमर्थं नैराश्यं श्वेत-केशैः।

परिश्रमसातत्येन शोधफलितत्वेन च सौगन्ध्य-युतम् आयुर्वेदिकम् ग्रेहाल्ट-केश-तैलं विलक्षण-वनस्पति-विशेषद्वारा साधितं विद्यते।

एतेन केशानां श्वेतीकरणं रुद्धं भवति। श्वेत-केशानां कृष्णीकरणे च साहाय्यं भवति। सहस्रशः प्रशंसापत्राणि प्राप्तानि। यदि भवतां केशाः कृष्णवर्णाः दिदृक्ष्यन्ते तर्हि परीक्ष्यताम् इदम् एकवारम्। मूल्यम् ९ रूप्यकाः। एकत्र बाटलिकात्रयम् २५ रूप्यकाः।

(विशेष :– अनेन बुद्धिः तेजस्विनी सूक्ष्मा च भवति।)

विजय-चिकित्सा-केन्द्रम्

पोस्ट– कतसरीसराय (गया)

विनामूल्यः उपहारः – टेरिलिन-वस्त्र-विशेषः

॥ यथेच्छवर्णाङ्कितः॥ (पॅण्ट-कमीज-अथवा बुशशर्ट-कृते) एकस्य भागस्य मूल्यं केवलं १४ रूपकाः। प्रेषाव्ययः पृथक्। पूर्णसूट-कृते २५ रूप्यकाः। बन्धनं तथा प्रेषा विनामूल्यम्। एकभागे अपेक्षिते—एका झरणी (पेन) पूर्णसूट द्वे भागे प्रार्थिते झरणीत्रयम् उपहारत्वेन विनामूल्यम्। भूषारसिकाः व्ही. पी. पार्सलकृते सत्वरम अद्य एव लिखन्तु। यतः संग्रहः समर्यादिः।

श्रीशङ्करकेन्द्रम्

लालबीघा (गया)

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मे वै हितपुंसां

आसीत् कश्चित् वत्सशर्मा नाम विद्वान् यस्य विषये 'न मातृतुल्यः क्वचिदस्ति बन्धुर्न वत्सशर्मप्रतिमोऽस्ति विद्वान्' इत्यासीज्जनश्रुतिः। तस्य महावेदविदः प्रपौत्रो बभूव भट्टदारिलनामा। अनेन कौशिकसूत्रस्य अथर्ववेदीयस्य भाष्यं लिखितम्। अप्राप्यमेवास्ति तद् भारते। अस्य एकाकिनी पाण्डुलिपिः वर्तते 'बर्लिन्'-नगरे राजकीये ग्रन्थालये। महता प्रयत्नेन प्राप्तस्यास्य भाष्यस्य आरम्भे एव वर्तन्ते चत्वारि वाक्यानि—"श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। मे वै हितपुंसां। अथ वेदभाष्यं लिख्यते।" प्रथमे द्वे नमस्कारपरे। चतुर्थे स्पष्टमेव ज्ञायते अनुस्वारलोपः 'लिख्यते' इत्यस्य पूर्वम्। किंतु तृतीयम् अस्य लेखस्य शिरोभागे दत्तं वाक्यम्। अस्य कोऽर्थः कर्तव्यः कथं च तस्य योग्यता ग्रन्थारंभे इति यक्षप्रश्नः।

कौशिक-सूत्रं प्रथमं मुद्रापितं ग्रहवसुद्वयभूमिते ईशवीये संवत्सरे। मुखपत्रमेवमस्य अधोलिखितम्।

"अथर्ववेदस्य कौशिकसूत्रं
रामेण पुष्पक्षेत्रेण श्रोत्रा बल्तिमोराख्ये महानगरे
अमरिक देशे संशोधितमीशसंवत्सरे
१८८९"

रामः पुष्पक्षेत्रे इति (मॉरिस् ब्लूमफील्ड) इत्यनेन स्वस्यैव नाम्नः कृतः संस्कृतानुवादः। संशोधकेनानेन प्रस्तावनायाम् उपरि निर्दिष्टस्य दारिलभाष्यस्य एकाकिनो लिखित-पुस्तकस्य विषये प्रकटीकृतं स्वान्तं यदेतत् लेखकप्रमादैः परिपूर्णं, किंबहुना सर्वोऽप्येष लिखितग्रन्थसमुच्चयः अशुद्धपाठानां भयावहः संग्रह इति। अत एव तेन यत्रे अर्थो न ज्ञातः स भाग एवावज्ञातः।

'अशुद्धमेतत्' इति उच्चैर्घोषं कृत्वा कस्यचित् भागस्याग्रहणं सुलभं किंतु नैषा सरणिर्विद्यार्थिनाम्। अशुद्धस्य शुद्धीकरणम्, अस्पष्टार्थस्य स्पष्टार्थीकरणम् एव संशोधनम्। लिखिते ग्रन्थे लेखकप्रमादो भवत्येव। मनुष्यस्य अज्ञानं, लेखन्याः स्खलनं, तत्कारणम्। किंतु कुत्र न वर्तन्त एते प्रमादाः? आधुनिके यन्त्रयुगे मुद्रितेषु ग्रन्थेषु प्रकाशिते शुद्धिपत्रेऽपि नैकशो मुद्राराक्षसाः संमुखे दृश्यन्ते। अत एव प्राचीन-लेखकाः स्वलेखनस्यान्ते प्रायो लिखन्ति स्म यत् "यादृशं पुस्तके दृष्टं, तादृशं लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न विद्यते।" तस्माद्यदि

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

कश्चिद् भागोऽशुद्धः, कश्चित् अस्पष्टार्थः तस्य निराकरणमेव कार्यं, न केवलं विनिन्द्य तूष्णींभावेन स्थातव्यम् ।

क उपायः अस्मिन् कार्ये इति विषये तु पुनः पुनः पाठः, भूयो भूयो विचार इत्येव । एतदेव तपः, अनेन एव तपसा भृग्वादिभिः सम्यग्ज्ञानं प्राप्तम् । तदेव मम समालम्बनम् । मयापि न ज्ञातेऽपि अर्थे नैकशः अस्य दारिल-भाष्यस्य पाठः क्रियते । पाठे पाठे च कश्चिदर्थः स्पष्टो भवत्येव । एतेषु पाठेषु "तस्मात्पदविचारोऽत्र प्रथमं प्रतिच्यते," "स्वतो न जानन्ति शिवं मनुष्याः" इत्यादीनां वाक्यानामुच्चारणकाले तेषां छन्दोबद्धत्वेन-मम मनः आकृष्टम् । "गुरोरियं कृतिः' इति पठित्वा प्रश्नः समुत्थितो मे मनसि । किं भट्ट-दारिल-संमुखे आसीत् काचित् छन्दोबद्धा रचना, यां स्पष्टीकर्तुं तेन गद्या सरणिः स्वीकृता ? अस्यामेव विचार-धारायां पाठसमये एकस्मिन् दिवसे 'मेवैहितपुंसां' इति पाठो मुखतः प्रवाहितः । 'हित' इतस्य स्थाने हितमिति मुखतो विनिर्गतम् । किंतु अनेन लघीयसा अनुस्वारेण विद्युत्प्रकाश इव प्रकाशितो बभूवार्थः । अनेन ग्रन्थे 'मे हितं भविष्यतीति स्पष्टमेव किंतु अनेन पुंसां सर्वेषां नराणामपि हितं निश्चयेन भवेत्' इति हेतुः स्पष्टो जातः । चतुर्णामपि वाक्यानामन्योन्यसंबन्धोऽपि सुष्ठु ज्ञातः । आद्ययोः वाक्ययोः ग्रन्थारम्भे नमस्क्रिया, तृतीये वाक्ये हेतुः, चतुर्थे वाक्ये ग्रंथनाम इति सर्वमेवोपपन्नं जातम् ।

किंतु ग्रन्थस्य नामापि वेदभाष्यं न, यतः अत्र वेदस्य भाष्यं नैव वर्तते । दारिलेनैव प्रस्तावनायां कथितं यत् संहिताविधिरिति-ग्रन्थनाम कौशिकसूत्रस्य । यद्येवं तर्हि विधिभाष्यमित्येव दारिलभाष्यनाम भवितुमर्हति । ग्रन्थलेखने ये अपपाठाः स्पष्टमेव दृश्यन्ते, तेषां तुलनात्मिका सारणिः कृतास्ति मया । तस्या एतद् दृश्यते यदनेकवारं लेखकः प्राचीन-लेखे एकारसूचका या पृष्ठमात्रा दीयते तां ह्रस्वेकारसूचकां पठति व्युत्क्रमेण च इतरेतराम् । तस्मात् चतुर्थं वाक्यम् "अथ विधिभाष्यं लिख्यते ।"

तथापि नैषा वाक्यचतुष्कपद्धतिः कुत्रायन्यत्र गद्यग्रन्थे दृष्टा वा श्रुता वा । नाप्येषा श्रुति-मनोहरा । किंतु यद्येतानि चत्वारि वाक्यानि पद्येगुम्फितानि स्युः तेषां श्रुतिकटुत्वं न प्रतीयेत । यथा—

श्रीगणेशं नमस्कृत्य
तथैव श्रीसरस्वतीम्
इति मे वै हितं पुंसां
भाष्यते संहिता-विधिः ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुण्यपत्तनस्थ-सांस्कृतिक-प्रवृत्तीनाम्

आश्रयस्थानम्

उ द्या न प्रा सा दः ।

(दू र वा णी ५७४९१)

अत्रैव निवासस्थानं शृंगेरीजगद्गुरु-श्रीमत्-

शंकराचार्यश्रीचरणानाम् ।

कदाचिदेवं-प्रकारकः श्लोकः भट्टदारिलस्य गुरोः कृतौ स्यात् तस्यैव पादाः अनेन भाष्यकारेण गद्यरूपेण लिखिता भवेयुः, आरम्भे निर्दिष्टैश्चतुर्भिर्वाक्यैः ।

यद्यस्मात् पाठात् कश्चित् सुष्ठुतरः पाठः केनचित् सूच्यते, तस्य धन्यवादपूर्वकं स्वीकारो भवेदिति हेतोः एतत् प्रकटचिन्तनं प्रकाशयितुम् इच्छामि ।

मुद्रिका ८०, पर्वतीदर्शनम्, दिवेकरोपाह्वो रामचन्द्रसुतो 'हरिः'
पुण्यपत्तनम् ९.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

हिन्दुहृदय

(सावरकर हिन्दुविद्या-संशोधनमन्दिरस्य मराठीभाषं त्रैमासिकम् । प्रथमवर्षस्य प्रथमोऽङ्कः । संपादकः– म. म. बाळशास्त्री हरदासः ।)

वार्षिकं मूल्यं रु. ५. एकस्य अङ्कस्य रु. १–५०

"न हि सावरकर-मतानां प्रचारः अस्य संशोधनमन्दिरस्य प्रयोजनम् । नास्ति सत्यस्य कश्चित् पक्षो नाम, संप्रदायो वा । विद्या, शास्त्राणि, तथा च इतिहासः इत्येतद्गतेषु विषयेषु सत्यसंशोधनम् अस्याः संस्थायाः उद्दिष्टम् ।"

जनो हि परप्रत्ययनेयबुद्धिः, पूर्वग्रहग्रस्तश्च । अतः सः एतत्-पत्रिकाविषयेऽपि कमपि कमपि अन्यथाग्रहं कुर्याद् इति उत्प्रेक्षमाणैरिव संपादकैः इत्थं स्पष्टीकृताऽस्ति पत्रिकाभूमिका । संशोधनमन्दिरस्य सावरकर-नामाङ्कन-करणे इत्थम् औचित्यं ते प्रदर्शयन्ति—

"स्वा. वि. दा. सावरकर महाभागाः राष्ट्रवादिनाम् इतिहास-संशोधकानाम् अग्रेसरा आसन् । तेषाम् अनुपमा राष्ट्रसेवा, क्रान्तदर्शिनी प्रतिभा, मूलग्राहिणी विचक्षणता, तथा च सर्वंकषं पाण्डित्यम् इत्येतदादि-गुणसंपदः संमानार्थम् इयं संस्था तन्नाम बिभर्ति इति ।

ज्ञातव्यम्, तथा च कर्तव्यम् इति अंशद्वयं वर्तते मानवजीवनस्य । प्रायेण ज्ञातव्यप्रधानाः सन्ति संशोधनपत्रिकाः । 'हिन्दुहृदयं'तु कर्तव्यांशम् अपि न परिहर्तुम् इच्छति (अत्र इत्थं संपादकीयम्—अद्य समग्रं जगत् जडवादोपहतम्, अतश्च विनाशगर्तोन्मुखम् । तस्य परित्राणं हिन्दुसमाजस्य ईश्वरादिष्टम् अवतारकार्यम् । इदं कार्यं कर्तुं स तदैव पारयेत्, यदा स एकात्मा बलवांश्च स्यात् । इयं च एकात्मता, बलवत्ता च तदैव उत्पद्येत, यदा विशिष्टं भावजीवनम्' तस्मिन् जागृयात् । एतस्य 'भावजीवन' स्य जागरणं 'हिन्दुहृदय'– प्रयोजनम् ।

स्वा. सावरकरेभ्यः प. पू. श्री. गुरुजीभिः अर्पितः श्रद्धाञ्जलिः अत्र समावेशितोऽस्ति । भ्रातृकलहो हिन्दुत्वनिष्ठानां प्राचीनं हृदयशल्यम् । तस्य अपाकरणे बाळशास्त्रिण एव समर्थाः । निदर्शनम् एतस्य एतल्लेखप्रकाशनम् । आशास्यते हिन्दुहृदयम् अस्यां दिशि अग्रतःसरं भवेदिति ।

श्री. बाळशास्त्रिभिः भगवन्तं महादेवम् उद्दिश्य लिखिते लेखे पूर्व-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

सूरीणां नैकानि मतानि संगृहीतानि सन्ति । अस्य उत्तरार्धः सौत्सुक्यं प्रतिपाल्यते । अस्यां पत्रिकायां नैयत्येन प्रकाशयिष्यमाणाः श्री काञ्ची-कामकोटि-पीठाधीशानाम् आचार्याणां लेखाः तस्यै किमपि नैर्मल्यम् अधिकारवत्तां च प्रदद्युः ।

अन्यास्वपि भाषासु पत्रिकाप्रकाशनं संचालकानां संकल्पितम् । संस्कृतेऽपि पत्रिका संचालनीया, तस्याः संपादनभारश्च प्रा. डॉ. वर्णेकरेषु निक्षेप्तव्यः इति सूचयामः ।

हिन्दुहृदयस्य प्रगतिं साफल्यं च आशास्महे ।

५९३ सदाशिव पेठ, डॉ. ग. बा. पळसुले
पुण्यपत्तनम् २.

सर्वाभ्युदयार्थं विद्यादेवी एव शरणम् ।

निपाणी दि. २९ जून–(विशेष-प्रतिनिधितः)

"व्यक्तेः गुणाः अपि समाजस्य महत् धनम् अस्ति । एतद् धनं सर्वथैव समाजेन संवर्धनीयम् एव । विद्यार्थिवराणां गुणानां मूल्यमापनं प्रशंसनं च अवश्यमेव करणीयम् । समाजस्य महत्त्वं तदङ्गीभूतैः व्यक्तिविशेषस्य गुणैः एव अनुमीयते । अद्यतनीयाः छात्राः एव भाविनः समाजस्य, राष्ट्रस्य च कर्णधाराः । संयमेन निष्ठया च कार्यं संपाद्य समाजे स्वकीयं स्थानम् उच्चतमं करणीयम् । एतादृशे कठिनतमे अपि काले स्वज्ञानस्य तपसः च मूलं सुस्थिरं कृत्वा आत्मविश्वासपूर्वकं कार्यं करणीयम् । पाश्चात्यराष्ट्रदृष्ट्या स्वराष्ट्रस्य प्रगतिः न्यूनीभूता मा भूयात् । पश्चात्ताप-प्रसङ्गश्च मा भवेत् । समाजस्य राष्ट्रस्य च सर्वाभ्युदयार्थं विद्यादेवी एव शरणम् । एतदेवअसाधारणं साधनम्, नान्या गतिः ।" इति विचाराः शिवाजी-विश्वविद्यालय-कुलगुरुभिः डॉ. अप्पासाहेब पवार महाभागैः शैक्षणिक-परिवार-समारोहाध्यक्षत्वेन प्रकटीकृताः ।

अत्रत्ये प्रभातचित्रगृहे अयम् अभूतपूर्वः समारम्भः समजनि । अस्याः सभायाः सञ्चालकाः विधानसभा-सदस्याः श्रीमन्तः गोविन्दराय मानवी महोदयाः आसन् ।

आदौ अस्य समारम्भस्य कार्यवाहाः प्रा. ज. दा. कुलकर्णी महोदयाः शैक्षणिक-परिवारस्य पार्श्वभूमिं विशदीकृत्य समुपस्थितानां गुणि-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

जनानां स्वागतं विधाय अध्यक्षमहोदयेभ्यः पारितोषिकप्रदानार्थं विज्ञापनाम् अकुर्वन् ।

काश्चन कन्यकाः पद्यमयं सरस्वतीस्तवनं जगुः। अनन्तरं कुलगुरवः आसप्तमकक्षा - पदवीपरीक्षान्तं प्राथमिक - शालान्त - परीक्षा - मण्डलम् बिल्वग्रामः, (बेळगांवग्राम) माध्यमिक - शालान्त परीक्षा - मण्डलं, पुण्यपत्तनम्, माध्यमिक-शालान्त-परीक्षा-मण्डलम्, बेङ्गलूरम्. शिवाजी-विश्वविद्यालयः करवीरम्, कर्नाटक-विश्वविद्यालयः, धारवाडनगरम्-इत्येतासां संस्थानाम् अभ्यासक्रमाः ये अद्य निपाणी-अर्जुननगर-परिसरे प्रचाल्यन्ते तेषाम अभ्यासक्रमाणाम् विविधासु परीक्षासु तत्र तत्र प्राथम्येन उत्तीर्णेभ्यः ३१ छात्रेभ्यः सरस्वती-चित्राणि, अभ्यासोपयोगीनि पुस्तकानि, स्वादुखाद्यं (दुग्धमोदकाः) च समर्पयन् । तदतन्तरं तैस्तैः छात्रैः कन्नड- महाराष्ट्र-उर्दू- इत्यादि-भाषासु सत्कारविषयिणी स्वकीया कृतज्ञता प्रकटीकृता । स्वप्राथम्यविषये गुरुजनाः एव प्रधानं कारणम् इति तैः प्रतिपादितम् । तदनन्तरं तत्तत्संस्थाप्रमुखाश्च सरस्वती-प्रतिमा-दानेन संमानिताः । तेषां प्रतिनिधीनां कालसमुचितानि भाषणानि अभूवन् ।

सभासञ्चालकैः विधानसभासदस्यैः गोविन्दरायमानवी महोदयैः राष्ट्रीयैक्यार्थम् अस्य समारम्भस्य अपूर्वताम् आवश्यकतां च प्रतिपाद्य कुलगुरुभ्यः सरस्वती-प्रतिमा-श्रीफलप्रसाद-पुष्पगुच्छादिकं समर्पितम् ।

अस्मिन् समारम्भे छात्राः, पालकाः, शिक्षकाः, प्राध्यापकाः स्त्रीपुरुष - नागरिकाश्च सहस्राधिकसंख्याकाः समुपस्थिता आसन् । चित्रपटगृहस्य सभास्थानं समुचिताकारेण विलसन्त्या सरस्वतीदेवीप्रतिमया सुशोभितम् आसीत्। समारम्भस्य शुभारम्भस्तावत् कुलगुरुमहोदयैः सरस्वती- पूजनेन विहितः । समारम्भान्ते “ वन्देमातरम् ” श्री. बाळासाहेब कुलकर्णी, (पट्टणकुडी) इत्येतैः गीतम् । भारतदेश-जयजयकारेण च समाप्तः समारम्भः ।

स्मर्यताम् ! स्मर्यताम् ! स्मर्यताम् !

शारदा-मुद्रण-सिद्धि-मन्दिरम्, पुण्यपत्तनम् २

४२५ सदाशिव पेठ, खजिनामहाल-भवनम् पुण्यपत्तनम् २

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

ॐ

॥ श्री शृङ्गेरी श्रीजगद्गुरुसंस्थानम् ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य-पदवाक्यप्रमाणपारावारपारीणयमनियमासनप्राणायाम-प्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठतपश्चक्रवर्त्यनाद्यविच्छिन्न-श्रीशङ्कराचार्यगुरुपरम्पराप्राप्तषड्दर्शनस्थापनाचार्य-व्याख्यानसिंहासनाधीश्वर-सकलनिगमागमसारहृदय-सांख्यत्रयप्रतिपादक-वैदिकमार्गप्रवर्तक-सर्वतन्त्रस्वतन्त्रादिराजधानीविद्यानगरमहाराजधानीकर्णाटकसिंहासनप्रतिष्ठापनाचार्य-श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य-ऋष्यशृङ्गपुरवराधीश्वर-तुङ्गभद्रातीरवासि-श्रीशङ्करपादपद्माराधक-श्रीजगद्गुरुश्रीचन्द्रशेखरभारतीस्वामिगुरुकरकमलसञ्जात—

॥ श्रीजगद्गुरु-शृङ्गेरी-श्रीमदभिनवविद्यातीर्थस्वामिभिः ॥
अस्मदत्यन्तप्रियशिष्य श्री वसन्तराव गाडगील महोदयानां
श्रेयोभिवृद्धये नारायणस्मरणपूर्वकविरचिताशिषः समुल्लसन्तुतराम् ॥

श्रीमदद्वैतमतप्रतिष्ठापनाचार्यैः श्रीमच्छंकरभगवत्पादैः चतसृषु दिक्षु प्रतिष्ठापितेषु चतुर्षु मठेषु दक्षिणस्यां दिशि विभाण्डकमहर्षेः सूनोः श्रीमदृष्यशृङ्गमुनेः आश्रमे शृङ्गगिरिरिति विख्याते पुण्यक्षेत्रे प्रतिष्ठापिते मठे विराजमानं श्रीशारदापीठमधिष्ठना वयम् आसेतोः आ च तुहिनाद्रेः भारते निवसतां सकलानाम् आस्तिकमहाजनानां जगत्प्रतिष्ठासाधनयोः प्रवृत्तिनिवृत्तिधर्मयोः श्रद्धाभूमोदयपुरस्सरमभ्युदयनिःश्रेयसयोरवाप्तये श्रीशारदाचन्द्रमौलीश्वरयोः अहरहः अर्हणमाचरन्तः शुश्रूषया समागतेभ्योऽन्तेवसद्भ्यः औपनिषदं सांख्यं प्रतिपादयन्तो वर्तामहे ।

वयं बदरीकेदारादिपुण्यक्षेत्राणां भागीरथ्यादिपावनतीर्थानां च सेवनं विधाय शृङ्गगिरिक्षेत्र समागताः । अस्मिन् कीलकसंवत्सरे शृङ्गगिरिक्षेत्रे नृसिंहवने अस्मदाचार्यसन्निधौ व्यासपूजा-चातुर्मास्य-संकल्पप्रमुखान् धर्मान् आषाढपूर्णिमायां बुधवासरे अन्वतिष्ठाम । श्रेयः प्रतिपादनपटीयांसो व्यामाक्षताः श्रीशारदाप्रसादश्च प्रहिताः । एतान् सादरम् आदाय आत्मानं कृतार्थयितुं प्रकृतिा एव बद्धश्रद्धानां विनेयानां अलमधिकविलेखनेन ॥ ॥ इति शिवम् ॥

कीलक सं. आषाढ बहुळ तृतीयायां
शुक्रवासरे शृङ्गगिरितः ॥

॥ श्रीः ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शारदा-(पुण्यपत्तनम् २.) ९ः १९-२० ★ रजि. क्र. एम्. एच्. ५५७
• लायसेन्स क्र. १३७ टु पोस्ट विदौट प्रीपेमेण्ट.

नागपुरस्थ-भोसला-वेदशास्त्र-महाविद्यालये राष्ट्रपति
डॉ. राधाकृष्णेभ्यः सन्मानं स्वीकुर्वाणः पं. हरदासः बाळशास्त्री-

स्वर्गतः संस्कृतात्मा बाळशास्त्री

पुण्यपत्तनम् दि. १२ ऑगस्ट —

महाराष्ट्र-संस्कृत-परिषदः सभापतिः साहित्याचार्यः हरदासः बाळशास्त्री गतरात्रौ ११–४५ वादनसमये नागपुरे हृदयाघातकारेण स्वर्गं गतः इति सशोकावेगं निवेद्यते । संपादकः ।

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ
मुद्रणस्थलम्– यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २
प्रकाशनस्थलम्-१.- म.म. प्रा.द.वा.पोतदार,४९८ शनिवार,पुण्यपत्तनम् २
२.–श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४
कार्यालयः— खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् २.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri